तस्या द्वारं समासाद्य न्यसेयाः कुणपं क्वचित् ।
तं दृष्ट्वा यो निवर्त्तेत स सम्बर्त्तो मतीयते ।'' ॥)

एतदर्थे नपुंसकलिङ्गोऽपीति नयमानन्दः ॥ पूतिगन्धिः । इति मेदिनी ॥ अस्त्रविशेषः । वड़शा इति भाषा । इत्यमरटीकायां रायमुकुटः ॥ पूतिगन्धौ त्रिलिङ्गोऽपि यथा,—
"कुणपं मलुलुङ्गाभं सगन्धं क्वथितं बहु" ॥
इति माधवकरः ॥ (रोगविशेषः । यथा ॥ "कुणपश्चात्रपित्ताभ्याम्" । इति शार्ङ्गधरे मध्यखण्डे । ९ अध्यायः ॥)

कुणपी, स्त्री, (कुणप + गौरादित्वात् ङीष् ।) विट्शारिका । इति मेदिनी ॥ गुयेशालिक इति भाषा ॥

कुणालः, पुं, (कण + "पीयुक्कणिभ्यामिति" उणां ३ । ७६ । इति । कालन् । सम्प्रसारणञ्च ।) देशभेदः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (अशोकराजपुत्त्रेष्वेकः । स च बौद्धः ॥)

कुणिः पुं, (कुण + इन् ।) तुन्नवृक्षः । इत्यमरमेदिनीकरौ ॥ तुंद इति भाषा । (शरीरस्य स्थानविशेषः ।
"कक्षाक्षमध्ये कक्षाधृक् कुणिलं तत्र जायते" ॥
इति वाभटे शारीरस्थाने ४ अध्याये ॥)

कुणिः, त्रि, (कुण + इन् ।) कुकरः । इति मेदिनी ॥ कोपा इति भाषा ॥ (यथा, सुश्रुते ।
"गर्भवातप्रकोपेण दोहदे चावमानिते ।
भवेत् कुब्जः कुणिः पङ्गुः" इति ॥)

कुणिन्दः, पुं, (कुण शब्दे + "कुणिपुल्योः किन्दच्" । उणां ४ । ८५ । इति किन्दच् ।) शब्दः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कुण्टकः, त्रि, (कुटि + ण्वुल् ।) स्थूलः । इति शब्दमाला । मोटा इति भाषा ॥

कुण्ठः, त्रि, (कुण्ठति क्रियासु मन्दीभूतो भवति । कुठि + अच् ।) क्रियासु मन्दः । अकर्म्मण्यः । इत्यमरः । २ । १ । १७ ॥
(यथा, शङ्करकविकृते विष्णुस्तोत्रे १० ।
"वैकुण्ठीये ऽवकण्ठे वसतु मम मतिः कुण्ठभावं विहाय" ॥) मूर्खः । इति मेदिनी ॥

कुण्ठकः, त्रि, (कुण्ठति कुण्ठयति वा आत्मानं जड़ीभूतं करोति । कुठि + ण्वुल् ।) मूर्खः । इति शब्दमाला ॥

कुण्ठितः, त्रि, (कुठि + कर्त्तरि क्तः ।) सङ्कुचितः । यथा । "दशवदनमुखानां कुण्ठिता यत्र शक्तिः" ॥ इति महानाटकम् ।

कुण्डं, क्ली, (कुणतीति । "जमन्तात् डः" । उणां १ । ११४ । इति डः ।) मानभेदः । (कुण्ड्यते रक्ष्यते जलं यत्र । कुड़ि + अधिकरणे अप् ।) देवजलाशयः । इति मेदिनी ॥ जलाधारविशेषः । चौवाचा इति भाषा ॥
तज्जलगुणाः । अग्निकफकारित्वम् । रूक्षत्वम् । मधुरत्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥ कफानलकत्वम् । इति राजवल्लभः ॥ * ॥ (पात्रविशेषः । यथा, रघौ १ । ८४ ।
"सुवं कोषेण कुण्डोध्नी मेध्येनावभृतादपि" ॥)
होमीयाग्न्याश्रयः । तत्तु प्रायशश्चतुरस्त्रमितं भवति तस्य विधिः । तत्र मत्स्यपुराणम् ।
"प्रागुदक्प्लवनां भूमिं कारयेद्यत्नतो नरः" ॥
प्रागुदक्प्लवनां पूर्व्वनीचां उत्तरनीचां वा ॥
तत्र वशिष्ठपञ्चरात्रे विज्ञानललितायाञ्च ।
"सर्व्वाधिकारिकं कुण्डं चतुरस्रन्तु सर्व्वदम्" ।
चतुरस्रं चतुष्कोणम् । भविष्योत्तरम् ।
"सहस्रे लक्ष होतव्ये कुर्य्यात् कुण्डं करात्मकम् ।
द्विहस्तमयुते तत्र लक्षहोमे चतुष्करम्" ॥
द्विहस्तादिके यामलः ।
"पूर्व्वपूर्व्वस्य कुण्डस्य कोणसूत्रेण निर्म्मितम् ।
उत्तरोत्तरकुण्डानां मानं तत्परिकीर्त्तितम्" ॥
पूर्व्वपूर्व्वस्य कुण्डस्य हस्तद्विहस्तादिमितस्य कोणसूत्रेण ईशानाग्निनैर्ऋतिकोणदत्तसूत्रेण परिमितं यन्मानं उत्तरोत्तरकुण्डानां तदेव पारिभाषिकं द्विहस्तादिमानं न तु प्रकृतहस्तद्वैगुण्यादिमितम् । तथात्वे द्विहस्तादिमितस्य चतुर्हस्तपरिमाणापत्तेः । क्षयकस्य भूमेः परिमाणवत् ॥
वशिष्ठपञ्चरात्रे ।
"यावान् कुण्डस्य विस्तारः खननं तावदिष्यते ।
हस्तैके मेखलास्तिस्रो वेदाग्निनयनाङ्गुलाः ॥
कुण्डे द्विहस्ते ता ज्ञेया रसवेदगुणाङ्गुलाः ।
चतुर्हस्ते तु कुण्डे ता वसुतर्कयुगाङ्गुलाः" ॥
मेखला ब्रह्मचारिमेखलावत् कुण्डवेष्टिता मृद्घटिताः । ताश्च खातदेशादाद्ये एकाङ्गुलरूपं कण्ठं परित्यज्य उच्छ्रायेण विस्तारेण चैवादिक्रमेण वेदाद्यङ्गुलाः । एतद्विपरीतास्तन्त्रान्तरोक्ता व्यवहारविरुद्धाः । वेदाश्चत्वारः अग्नयस्त्रयः नयने द्वे रसाः षट् गुणास्त्रयः वसुतर्कयुगानि अष्टषट्चत्वारि । पिङ्गलामते ।
"खातादेकाङ्गुलं त्यक्त्वा मेखलानां विधिर्भवेत्" ॥
एककुण्डस्य पश्चिमदिक्कर्त्तव्यतामाह मद्यादानिर्णये वशिष्ठपञ्चरात्रम् ।
"भुक्तौ मुक्तौ तथा पुष्टौ जीर्णोद्धारे तथैव च ।
सदा होमे सदा शान्तावेकं वारुणदिगतम्" ॥
शारदातिलके ।
"होतुरग्रे योनिराश्वासुपर्यश्वत्थपत्रवत् ।
मुष्ट्यरत्न्येकहस्तानां कुण्डानां योनिरीरिता ॥
षट्चतुर्द्व्यङ्गुलायामविस्तारोन्नतिशालिनी ।
एकाङ्गुलन्तु योन्यग्रं कुर्य्यादीषदधोमुखम् ॥
एकैकाङ्गुलतो योनिं कुण्डेष्वन्येषु वर्द्धयेत् ।
यवद्वयक्रमेणैव योन्यग्रमपि वर्द्धयेत् ॥
स्थूलादारभ्य नालं स्याद्योन्या मध्ये सरन्ध्रकम्" ॥
आसां मेखलानां अश्वत्थपत्रवदित्यनेन चतुरङ्गुलविस्तृतमूलात् यथोक्तक्रमेण एकाङ्गुलान्तःसंकुचितविस्तारा । यामले ।
"नाभमेखलयोर्मध्ये परिधेः स्थापनाय च ।
रन्ध्रं कुर्य्यात्तथा विद्वान् द्वितीयमेखलोपरि" ॥
परिधौ स्वदिग्व्यवस्थामाह छन्दोगपरिशिष्टे ।
"बाहुमात्राः परिधय ऋजवः सत्वचोऽव्रणाः ।
त्रयो भवन्त्यशीर्णाग्रा एकेषान्तु चतुर्दिशम् ॥
प्रागग्रावभितः पश्चादुदगग्रमथापरम् ।
न्यसेत् परिधिमन्यञ्चेदुदगग्रः स पूर्व्वतः" ॥
अन्यग्राः छिद्ररहिताः अभितोऽग्नेः पार्श्वद्वये दक्षिणतः उत्तरतः पश्चात् पश्चिमे उदगग्रं उत्तराग्रम् ॥ त्रैलोक्यसारेऽपि ।
"कुम्भद्वयसमायुक्ता अश्वत्थदलवन्नता ।
अङ्गुष्ठमेखलायुक्ता मध्ये त्वाज्यस्थितिर्यया" ॥
कुम्भद्वयसमायुक्ता गजकुम्भाकारमूलदेशयुक्ता नता नम्रा अङ्गुष्ठमितमृद्घटितमेखलावेष्टनयुक्ता तथात्वे हस्तगलिताज्यस्थित्या कुण्डे तत्पातो भवतीत्यर्थः ॥ पञ्चरात्रे ।
"कल्पयेदन्तरे नाभिं कुण्डस्याम्बुजसन्निभाम् ।
मुष्ट्यरत्न्येकहस्तानां नाभिरुत्सेधविस्तृता ॥
नेत्रवेदाङ्गुलोपेता कुण्डेष्वन्येषु वर्द्धयेत् ।
यवद्वयक्रमेणैव नाभिं एषगुदारधीः ॥
नाभिक्षेत्रं त्रिधा कृत्वा मध्ये कुर्व्वीत कर्णिकाम् ।
वहिरंशद्वये नाष्टौ पत्राणि परिकल्पयेत्" ॥ * ॥
तत्र कुण्डस्य दोषानाह विश्वकर्म्मा ।
"खाताधिके भवेद्रोगी हीने धेनुधनक्षयः ।
वक्रकुण्डे च सन्तापो मरणं छिन्नमेखले ॥
मेखलारहिते शोको ह्यधिके वित्तसंक्षयः ।
भार्य्याविनाशकं कुण्डं प्रोक्तं योन्या विना कृतम् ॥
अपत्यध्वंसनं प्रोक्तं कुण्डं यत् कण्ठवर्जितम्" ॥
अत एव वशिष्ठसंहितायाम् ।
"तस्मात् सम्यक् परीक्ष्यैव कर्त्तव्यं शुभवेदिकम् ।
हस्तमात्रं स्थण्डिलं वा संक्षिप्ते होमकर्म्मणि" ॥
इति तिथ्यादितत्त्वम् ॥

कुण्डं, क्ली स्त्री, (कुण्ड्यते रक्ष्यते मद्यादि अस्मिन् कुड़ि रक्षणे + अच् ।) स्थाली । इत्यमरभरतौ ॥

कुण्डः, पुं, (कुण्ड्यते दह्यते कुलं अनेन । कुडि-दाहे + करणे घञ् ।) अमृते भर्त्तरि जारजः । जीवति भर्त्तरि उपपतिजातः । इत्यमरः । २ । ६ । ३६ ॥ स्वामी वाँचिया थाकिते उपपतिजात विजन्म सन्तान इति भाषा ॥ (यथा मनुः ३ । १७४ ।
"पत्यौ जीवति कुण्डः स्यान्मृते भर्त्तरि गोलकः" ॥
सर्पविशेषः । यथा महाभारते । १ । १२३ । ६८ ।
"कुण्डपश्चाय कुण्डश्च तक्षकश्च महोरगः" ॥)

कुण्डकीटः, पुं, (कुण्डे नरककुण्डे स्थितः कीट इव चार्व्वाकसंसृष्टत्वात् ।) चार्व्वाकवचनाभिज्ञद्विजः । पतितब्राह्मणीपुत्त्रः ॥ (कुण्डे योनिकुण्डे कीट इव ।) दासीकामुकः । इति मेदिनी ॥

कुण्डगोलकं, क्ली, (कुण्डे पात्रविशेषे गोलं गोलाकारं कं जलं यत्र ।) काञ्जिकम् । इति हेमचन्द्रः ॥ (काञ्जी इति भाषा ॥ * ॥ कुण्डश्च गोलकश्च इति द्वन्द्वेऽपि कुण्डगोलकौ । यथा मनुः । ३ । १७४ ।
"परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ ।
पत्यौ जीवति कुण्डः स्यात् मृते भर्त्तरि गोलकः" ॥)

कुण्डगः, पुं, (कुण्डं तदाकारं गच्छति । गम + बाहुलकात् खः डिच् ।) कुञ्जम् । हस्त्यादिस्थानम् । इति हेमचन्द्रः ॥

कुण्डपाय्यः, पुं, (कुण्डैः अमसैः पीयतेऽत्र सोमः । कुण्ड + पा + अधिकरणे यत् युगागमश्च निपात्यते ।) क्रतुः । इति मुग्धबोधम् ॥